Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2024 GISRRJ | Volume 7 | Issue 6 | ISSN : 2582-0095

# मेघसन्देशस्य प्रतिसन्देशात्मकं घनवृत्तकाव्यम्

एम्.स्वाती
शोधच्छात्रा, साहत्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।
ऑफ़ इंटरनेशनल स्टडीज, जवाहरलाल नेहरु विश्वविधालय, दिल्ली।

**Article Info**
Volume 7, Issue 6

**Page Number :** 45-47

**Publication Issue :**
November-December-2024

**Article History**
Accepted : 10 Dec 2024
Published : 20 Dec 2024

**प्रस्तावना-** संस्कृतवाङ्मये महाकाव्यानां रचनमेव प्रथमम् अभूत् न केवलं संस्कृतवाङ्मयस्य किन्तु विश्ववाङ्मयेऽपि आद्यं काव्यं श्रीमद्रामायणमेव। रामायणाविर्भावानन्तरम् अश्वघोष - कालिदासादि महाकविकालपर्यन्तं काव्यानि न दृष्टानि। कालिदासः महाकाव्यैः सह खण्डकाव्यमपि मेघसन्देशवाख्यं रचितवान्। तदेव काव्यं सन्देशकाव्यानाम् आद्यं प्रसिद्धम्।

प्रियेण वियुक्तः प्रिया, प्रियया वियुक्तः प्रियो वा द्वितीयं प्रति स्वावस्थानिरूपकं, द्वितीयस्मिन् स्वप्रेम्णः आविष्करणरूपं, प्रियस्य प्रियया: वा समाश्वासनरूपं सन्देशं प्रेषयति। सन्देशप्रेषणार्थं च कमपि दूतं वृणीते। प्रथमं दूतं गन्तव्यं देशमुक्त्वा स्वनिवास स्थानादारभ्य गन्तव्यप्रदेशपर्यन्तम् अध्वानं विवृणोति। मार्गमध्ये स्थितानां दर्शनीयस्थलानां, दिव्यक्षेत्राणां च वर्णनं कृत्वा तेषु दूतेन आदरो दर्शनीयः इति उपदिशति। कालिदासेन मेघसन्देशकाव्ये दर्शितः एष एव क्रमः इतरैः महाकविभिरपि अनुसृतः।

सन्देशकाव्यानाम् इतिवृत्तम् सन्देशप्राप्तिपर्यन्तभागेन समाप्तं भवति। कदाचित् वियुक्तयोः समागमोऽपि वर्णितो भवति। किन्तु द्वितीयेन प्रतिसन्देशप्रेषणं मेघसन्देशकाव्यस्यैव इतरैः कविभिः रचितं दृश्यते। मेघदूतस्य प्रतिसन्देशात्मकानि काव्यानि पञ्चपाणि उपलब्धानि तेष्वपि आन्ध्रदेशकविना कोराड रामचन्द्रशास्त्रिणा रचितं घनवृत्तकाव्यं प्रमाणेन गुणेन सर्वमहत् दृश्यते।

**घनवृत्तकाव्ये इतिवृत्तम्-** कालिदासकाव्ये प्रियया वियुक्तः कश्चन यक्षः अलकापुरवासिनीं प्रियामुद्दिश्य स्वयं रामगिरिपर्वते वसन् प्रियामाश्वासयितुं मेघमुखेन सन्देशं प्रेषयति। कुबेरशापेन तौ दम्पती अन्योन्यं वियुक्तौ। शापोऽपि वर्षावधिकः, शापकाले मासचतुष्टये परिशिष्टे यक्षः सन्देशं प्रेषितवान्। कालिदासस्य कथाभागमेव आधारीकृत्य रामचन्द्रकविः A.D. विंशतितम शतकारम्भे घनवृत्तकाव्यं रचितवान्। शापोऽपि पूर्वजन्मनः कर्मफलम् अनुसृत्य अनुभाव्यः इति घनवृत्तकाव्ये वर्णितम्। यक्षपत्नी पूर्वजन्मनि कापि अप्सराः आसीत्। इन्द्राज्ञया सा शिवभक्तस्य कस्यापि यज्ञस्य तपोभङ्गं कृतवती। तदा तेन शप्ता अस्मिन् जन्मनि प्रियावियोगं अनुभवति। यक्षोऽपि ईर्ष्यया अनुरागयुक्तयोः दम्पत्योः पूर्वस्मिन् जन्मनि वियोगकारणं भूत्वा अस्मिन् जन्मनि प्रियावियुक्तोऽभूत्।

कालिदासकाव्ये केवलं कुबेरः यक्षं शशाप। घनवृत्तकाव्ये यक्षपत्न्यां दयावती कुबेरस्य पत्नी तामाश्वास्य ताम् देव्याः आराधने अनुरक्तां चकार। वियोगकाले यक्षपत्नी दैवाराधनतत्पराभूत्वा कालं नयति स्म। अष्टाधिकेषु मासेषु तथा व्यतीतेषु यक्षेण प्रेषितः मेघः यक्षसन्देशं श्रावयितुम् अलकाम् आगतवान्। एषा कथा द्वितीयसर्गे षड्विंशश्लोकपर्यन्तं उपवर्णिता।

**घनवृत्तस्वरूपम्-** प्रथमसर्गे द्व्यधिकनवतिश्लोकाः (92) वर्तन्ते। द्वितीयसर्गे द्व्यशीतिश्लोकाः (82) वर्तन्ते। प्रथमसर्गकथायां मेघेन यक्षगृहदर्शनं, स्वपरिचयदानं, भर्तृवाक्यैः मेघोक्तैः मेघं यक्षसखं विज्ञाय यक्षपत्न्या स्ववृत्तकथनमितिकथा उपवर्णिता। कुबेरपत्नी माम् एवं शापानुभवकारणमुक्तवतीति यक्षपत्नी मेघमुक्त्वा मेघे स्वविश्वासं दर्शयामास। ततः द्वितीयसर्गे शापकाले स्ववृत्तम् उक्तवती। यक्षपत्न्याः शापकाले कालक्षेपक्रमः तस्याः सखी मेघमुक्तवती। विशेषतः उत्तरार्धे घनवृत्तं मेघसन्देशकाव्यस्य प्रतिसन्देशात्मकमिति स्पष्टं भवति।

**घनवृत्तस्य मेघसन्देशं प्रति सन्देशत्वम्-** मेघसन्देशे अनुकरणात्मकाः समाधानरूपाश्च श्लोकाः अनेके घनवृत्तकाव्ये दृश्यन्ते।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**श्यामास्वङ्गं चकितहरिणी प्रेक्षणे दृष्टिपातं**
**वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।**
**उत्पश्यामि प्रतनुष्वु नदीवीचिषु भ्रूविलासान्**
**हन्त्यैकस्मिन् क्वचिदपि न ते चण्डि सादृश्यमस्ति।।**[1]

एतस्य श्लोकस्यानुकारी यक्षवाक्यानाम् अनुवादरूपः श्लोकः घनवृत्तेऽपि प्रथमसर्गे दृष्टः।

**वल्लर्वन्यारुचिरकुसुमस्तोमगुच्छाभिरामा**
**यातायातप्रसवविलसत्पुष्पलिट्पालिरम्याः।**
**हीरांकुरस्फरणमुकुलाशश्वदालोक्यरागी**
**तीक्ष्णश्वासैर्जितकिसलयं दूषितं दन्तचेलम्।।**[2]

प्रियायाः अवयवसादृश्य वताम् उपमानभूतानां वस्तूनां दर्शनेन भावनायां प्रियादर्शन सुखमनुभवन् कथञ्चित् कालं नयति इति भावः श्लोकद्वये तुल्यरूपः। प्रियावियुक्तः यक्षोऽपि मृतकल्पः इति घनवृत्तश्लोककथनं मेघेनोक्तं कालिदासस्यैव श्लोकानुकरणरूपं वर्तते।

मेघसन्देशे यथा -

**तामायुष्मन्मम च वचनादात्मनश्चोपकर्तुं**
**ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः।**
**अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः**
**पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव।।**[3]

कालिदासश्लोके यक्षस्य अव्यापन्नविशेषः मृतकल्पाभिप्रायकमिति मल्लिनाथेन व्याख्यातम्। रामचन्द्रकविस्तु अमङ्गलं परिहृत्य ईषत्परिवृत्य सः शरीरमात्रेण रामगिर्याश्रमेषु वर्तते मनस्तु त्वद्गतम् अलकायामेव वर्तते इति निरूपयन् तत्र यक्षोऽपि अव्यापन्न इति मल्लिनाथाभिप्रायं सूचितवान्। मनसः असान्निध्यात् यक्षः इन्द्रियव्यापारहीनः इति घनवृत्तश्लोकाभिप्रायः कालिदासादपि रमणीयतरो दृष्टः। यथा-

**तिष्ठत्येवं प्रियसुहृदयं कायमात्रेण तत्र**
**त्वय्यायत्त प्रणयगुरुणाचान्तरंगेण नित्यम्।**
**तस्माच्छापावधिमधकथं कारमप्यत्रसोढुं**
**घम्रान्तं वा खलु कुमुदिनी प्राहंसित्वं मुदैव।।**[4]

'मनसा प्रयुक्तानि इन्द्रियाणि उपलब्धौ कारणानि भवन्ति'[5] इत्यार्षवचनमनुसृत्य मनसः असान्निध्यात् यक्षो मृतकल्पः इति कालिदासभावोऽपि अत्र अनूदितः। घनवृत्तकाव्ये चतुर्थपादः कालिदासकाव्ये यक्षगृहवर्णस्य अनुकरणात्मकः एव यथा मेघसन्देशे-'सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्'[6]।

द्वितीयसर्गे यक्षपत्नी मेघमुखेनैव यक्षमुद्दिश्य पुनः प्रतिसन्देशं प्रेषितवती। तन्निरूपकाः षोडशश्लोकाः द्वितीयसर्गे वर्तन्ते। यक्षः शापान्तः चातुर्णां मासानामनन्तरं भविष्यति तावन्तं कालं त्वया कथञ्चित् प्राणाः धार्याः इति यानि वाक्यानि प्रियामुद्दिश्य उक्तवान् तथाविधान्येव वाक्यानि यक्षपत्न्या अपि प्रियसमाश्वासनारूपाणि घनवृत्ते निरूपितानि। प्रियक्षेमवार्तया प्राणाः धृताः भवन्ति इति भावः काव्यद्वये दृष्टः। मेघसन्देशे यथा-

**तां चावश्यं दिवसगणनातत्परामेकपत्नी**
**मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।**
**आशाबन्धः कुसुमसदृशं प्रायशो ह्यंगनानां**
**सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि।।**[7]

घनवृत्ते यथा-

**प्राणस्स्युश्चेद्भवति भावुकश्रेणिसंवीक्षितेति**
**ज्ञात्वा वाक्यं प्रमिति विषयं चिन्तयन्ती सम्मतात्।**
**त्वद्विश्लेषोदितविपुलशुझिर्झरीकृच्छ्रुछ्रा**
**त्सोढाभावीप्सितशुभधिया चक्रवाक्येव रात्रिः।।**[8]

दौत्यं तवद्विधस्य महतः अयोग्यमपि मयि सौहार्दात् आचरणीयं प्रियतमाम् एवमुक्त्वा पश्चात् त्वं यथेच्छं गच्छ प्रियया विद्युता वियोगः ते कदाचिदपि कथञ्चिदपि माभूदिति यक्षेण कृतं शुभाशंसनं, प्रतिसन्देशकथनान्तरं यक्षपत्नीवाक्येष्वपि काव्यद्वये दृष्टम्। मेघसन्देशे यथा-

**एतत्कृत्वा प्रियमनुचितं प्रार्थनादात्मनो मे**
**सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या।**
**इष्टान्देशान् जलद विचर प्रावृषा सम्भृतश्री**
**र्माभूदेवं क्षणमपि च ते विधुता विप्रयोगः।।**[9]

घनवृत्ते यथा-

**मद्वाक्येन प्रियसहचरं मत्प्रणामालिपूर्वं**
**क्षिप्रं गत्वा कथयतमिहोज्जीवयातिप्रयत्नात्।**
**पश्चाद्वर्षाचलनयनया भुक्तया भूरिकाला**
**त्संगम्येष्टान्यनुभवशुभन्यद्यवत्सप्रयाहि।।**[10]

**उपसंहारः-** एवं भूयसा घनवृत्तकाव्ये दृष्टं मेघसन्देशसमाधानरूपत्वं जिज्ञासुभिः तद्ग्रन्थद्वय समग्रसमीक्षणेन अवगन्तव्यम्।

**टिप्पणीः**

1. मेघसन्देशः-द्वितीयसर्ग-43 श्लोकः-पृ.सं.85
2. मेघसन्देशः-प्रथमसर्ग-39 श्लोकः-पृ.सं.54
3. मेघसन्देशः-द्वितीयसर्ग-40 श्लोकः-पृ.सं.83
4. घनवृत्तम्-प्रथमसर्गः-45 श्लोकः पृ.सं.60
5. महाभाष्यम्-परोक्षे लिट् (3-2-115) सूत्रव्याख्यायाम्
6. मेघसन्देशः-द्वितीयसर्गे -19 श्लोकः-पृ.सं.68
7. मेघसन्देशः-प्रथमसर्ग-10 श्लोकः-पृ.सं.12
8. घनवृत्तम्-द्वितीयसर्गे-37 श्लोकः-पृ.सं.38
9. मेघसन्देशः-द्वितीयसर्गः -55 श्लोकः-पृ.सं.94
10. घनवृत्तम्-द्वितीयसर्गः-40 श्लोकः-पृ.सं.41

**उपयुक्तग्रन्थसूची**

१. मेघसन्देशः-वोविल्ल रामस्वामिशास्त्रुलु अण्ड् सन्स्, चेन्नपुरी, 1933
२. घनवृत्तम्-Korada Lakshmi Manoharam, Dwaraka Nagar, Ananthapuram, 1917
३. सिद्धान्तकौमुदी (महाभाष्यम्) - चौखम्बा संस्कृतविद्याभवनम्, वारणासी, 195